

कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयः


M-565
कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह
दाखल क्र M565 विषय पूजा
नांव वास्तुशान्ति XEROX
लेखक/लिपीकार –
पृष्ठ 68
काळ – पूर्ण/अपूर्ण

श्रीगणेशाय नमः ॥ अथ गृहवास्तुविधिर्लिख्यते ॥ मंडपे संप्रवि
श्याथ तोरणादि प्रपूज्य च ॥ वास्तुयोगं ततः कुर्यान्मंडपे शुभल
क्षणे ॥ १ ॥ अभ्यर्चिता देवगणाः प्रहृष्टाः सदा महाशांतिकरा न
राणां ॥ ऐशानतो वाप्यथवाग्नितो भाद्पूजिता मत्स्यमयप्रद
ते ॥ २ ॥ तस्मात्त्वशास्त्याहृतगंधपुष्पधूपदीपादिभिरभ्यर्चये
नान्वादेवालये राजगृहेपि कार्यो वास्तुश्चतुःषष्ठिपदैरुपेतः ॥ ए
काधिकाशीतिपदैरुपेतो बुधैर्विधेयो थ गृहेषु वास्तुः ॥ उक्तं च वा

क्त शास्त्रे ॥ एकाशीतिपदं चैव सह्लिखेद्वास्तुमंडले ॥ नानावर्णैश्च रंगै
श्चपितवेलोपरि न्यसेत् ॥ सौवर्णं वारयेद्वास्तुं निष्कं निष्कार्धमेव च ॥ को
शलो माषमेकं स्याद्वित्तशाठ्यं न कारयेत् ॥ अथ पद्धतिः ॥ ततो यजमा
नः सुस्नातः सुप्रक्षालितपाणिपादः शुक्लवस्त्रानुलेपनमाल्याधरः
सपत्नीकः कर्मरक्षानमागस्य कुशोत्तरे पर्ण्यादि प्रशस्तदारुनिर्मितेपी
ठे उपविश्याचम्य प्राणायामं कालज्ञानानि स्मृत्वा मम पत्नीपुत्रादिकुटुं
बसहितस्य एतत्कर्मोपयुक्त स्वहृद्धंघूसहितस्य कूपादिप्रतिष्ठारव्यक

कूप

२

र्मणि वास्तुमंडलकुंडादिषु च प्रधानांगकर्मसु च हीनाधिकादिवै-
यथार्थ्यकरणसमस्तवास्तुदोषसूचितसर्वारिष्टानि निबर्हणार्थं अस्य
कर्मणः साङ्गुण्यार्थं क्षेमस्थिति आयुरारोग्यऐश्वर्याभिवृद्ध्यर्थं नूतन-
गृहशिलाहीनाधिकांगसमवेधादिदुष्टआयव्ययजन्यसकलदोषशांत्य-
र्थं अस्मिन्गृहे चिरकालनिवाससिध्यर्थं वास्तोष्पतेः प्रीतासिध्यर्थं च शान्ति-
कर्मपूर्वकं नवग्रहसहितां वास्तुशांतिं वास्तुपूजनं च महं करिष्ये ॥ त-
दंगत्वेन स्वस्तिपुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं आचार्यब्रह्मा-
सदस्य ऋत्विग्वरणं आदौ निर्विघ्नतासिध्यर्थं महागणपतिपूजनं चाहं

२ २ 3

करिष्ये ॥ इति संकल्प्य ॥ गणेशपूजनादि वृद्धिश्राद्धांतं कृत्वा ॥ आचार्या-
दि वरणं कृत्वा ॥ तद्यथा ॥ प्रारब्धस्य कर्मणः साङ्गुण्यार्थं सर्वारिष्टशांत्य-
र्थं अन्नदानं चायुतहोमलक्षणमग्रे वक्ष्यते इति मे हविते न्यसेत् ॥ एवं त-
डागोत्सर्गादिषु वैश्वदेवादिप्रतिष्ठासु तुलापुरुषदानादिषु च तत्तत्प्रति-
प्रयोगो ज्ञेयः ॥ वास्तुमंडले उक्तं च ॥ ततः सर्षपान्गृहीत्वा विकिरेत् ॥
यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा ॥ स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं
तत्र गच्छतु ॥ अपक्रामंतु० ॥ इति मंत्रद्वयेन सर्षपान्विकिरेत् ॥ देवस्य त्वा० ॥
आपो हि ष्ठेति तृचेन पंचगव्येन कुशोदकेन च प्रोक्षयेत् ॥ पूर्णाहुतिवि-

यानेन आज्यं संस्कृत्य ॥ स्तंभस्थापनावटेषु चतुर्षु प्रत्यवटमाग्नेयकोणा
दारभ्य प्रादक्षिण्येन स्रुवेणाज्यं गृहीत्वा ॥ अच्युताय भौमाय स्वाहा ॥ इ
त्यनेन एकैकामाहुतिं जुहुयात् ॥ इदमच्युताय भौमायेति प्रत्याहुतित्या
गः ॥ ततः होमक्रमेण अवटेषु स्तंभान् शिलां स्थापयित्वा तदुपरि ॥ इमामुच्छ्र
यामीत्यादिना मंत्रेण श्रेयो वसान इत्यंतेन स्तंभानुच्छ्रयति ॥ तद्यथा ॥ इमा
मित्यादिमंत्राणां विश्वकर्मा ऋषिः ॥ क्रमेण त्रिष्टुप्पंक्तिजगत्यनुष्टुप्छं
दांसि ॥ शाला देवता ॥ स्तंभानुच्छ्रयणे विनियोगः ॥ ॐ इमामुच्छ्रयामि भुव
नस्य नाभिं वसोर्धारां प्रतरणीं वसूनां ॥ इहैव ध्रुवां निमिनोमि शालां

क्षेमे तिष्ठतु घृतमुक्षमाणा ॥ १ ॥ ॐ अश्वावती गोमती सूनृतावत्युच्छ्र
यस्व महते सौभगाय ॥ आ त्वा शिशुराक्रंदत्वा गावो धेनवो वाश्यमानाः ॥ २ ॥
ॐ आ त्वा कुमारस्तरुण आ वत्सो जगदैः सह ॥ आ त्वा परिस्रुतः कुंभ आ
दध्नः कलशैरुप ॥ क्षेमस्य पत्नी बृहती सुवासा रयिं नो धेहि सुभगे सु
वीर्यं ॥ ३ ॥ ॐ अश्वावद्गोमदूर्जस्वत्पर्णं वनस्पतेरिव ॥ अभि नः पर्य
तां रयिरिदमनु श्रेयो वसानः ॥ ४ ॥ अनेन मंत्रेण होमक्रमेणैव चतु
र्षु अवटेषु चतुरः स्तंभान्निमिनोमि ॥ स्तंभाभावे अनेनैव मंत्रेण प्रत्यवटं
शिलां स्थापयेत् ॥ सूत्रारंभे शिलान्यासे प्रवेशे वास्तुपूजन इत्यस्य मे ॥

४

वक्ष्यमाणप्रकारेण वास्तुपूजा कर्त्तव्या॥ गृहमध्ये यथैवेशान्यामालिखेद्
वास्तुमंडलं॥ तद्यथा॥ भूमिं परीक्ष्य गोमयेनोपलिप्य रेखा लिखेत्॥
गृहकारियां॥ चतुरस्रा समालिख्ये त्रिवितस्तिद्वयसंमितं॥ हस्तद्वयमि
तं वास्या समसूत्रं समंततः॥१॥ रेखाः सुवर्णस्य शलाकया वाप्यवाल
मुक्तारजतादिभिर्वा॥ पिष्टेन धान्यैरपि मंगलैर्वा क्रमेण कुर्यादिह वा
स्तुगेहे॥२॥ कपालकाष्ठादिमषीनखैर्वा गैरादिना चात्तु निबध्य युक्ताः॥
रेखाः इस्ताः स्युः तापशोकव्याध्यर्थहान्यादिनिमित्तभूताः॥३॥ शि
खित्वमा वास्तुशरीररेखास्ता एव चार्या इति केचिदूचुः॥ याम्योदि

४

तः सौम्यदिगंतरेखास्तद्वत् संस्थाः दशपूर्वरेखाः॥४॥ मनोरमा स्यात्प्र
थमा तु ज्ञेयानंतः सुनंदा च सुताः समीचि॥ प्राणा विशालाऽथ जवेसु
कौतिर्यशो चराशांतिरिति क्रमेण॥५॥ तथैव रेखा परिपूर्वपश्चाद्रे
खाः दशता श्च दशातिर्यक्च॥ ज्वाला विहीनादि जयामहश्रीः सुनि
र्मला भूतिरनंततलक्ष्मीः अमा हिरण्यनि च पर्वबृथ्याय येष्टकाः स्थैर्य
युता सुसूक्ष्मेः॥६॥ पूर्वं लिखित्वा पुनरेव सम्यक् पिष्टान्नसूत्रेण लिखे
द्दृढेन॥७॥ मध्यविष्ठाइति भिन्नरूपारतं नादिदेवोपरि वर्जनीयाः॥
तं नादिना यघपिलास्तु विद्वास्वनामतुल्याथ विधानकास्तु॥८॥

५

वं ८१ काशीतिपदे वास्तु मंडपं तु संपादयेत् ॥ तत्र मध्ये कोष्ठ नवकं मुख्
ज्य ८१ कमेवपदं विदुर्ध्यात् ॥ तत्परितश्चत्वारिंशच्च पंचच ॥ पूजनीया
श्चते सम्यक् त्रिपदानि ॥ विंशतिर्द्वैकपदानि ॥ नावद्विपदानि ॥ उक्तं च ॥
मध्ये नवपदस्त्वेकं चत्वारि त्रिपदाः स्मृताः ॥ विंशतिस्त्वेकपदिकानां वै
तौ द्विपदाः स्मृताः ॥१॥ तत्र प्रतिष्ठितो देवाश्चत्वारिंशच्च पंच च ॥ पूज
नीयाश्चते सम्यक् गंधपुष्पाक्षतादिभिः ॥२॥ अथ वास्तु स्वरूपं कथ्यते ॥
अधोमुखं वास्तु शरीरमस्य सदा स्थितं मस्तकमीशकोणे ॥ जंघे च वा
चितेकूर्परमस्य वामवायव्यनैर्दक्षिणमग्निकोणे ॥१॥ हस्तद्वयं तिष्ठति

५

९०

न्मध्यदेशे नैऋत्य संस्थौ चरणौ भवेतां ॥ विश्वंभरवास्तु शास्त्रे ॥ ईशान्येतु शिरस्त
स्य नैऋत्यां घ्रिरधोमुखः ॥ जानुनि कूर्परं चैव वायव्याग्नि चकोणके ॥ उदरं त
स्य वैमध्यामेवं रूपो व्यवस्थितः ॥ अथ चतुःकोणयुते वास्तु शरीरं क्रमेण दे
वतादिन्यासः ॥ स्यथा ॥ मूर्ध्नि शिखिरित्यर्थः ॥ मुखे आपः ॥ अक्ष्णोर्दिति
कुलिशायुधौ ॥ कर्णयोरदितिजयंतौ ॥ हृदि आपवत्सः ॥ स कूर्परे दक्षिण बा
हुभोगे सूर्यसत्यमृशाकाशवायवइतिपंच ॥ प्रकोष्ठे रुद्रजयसवितृसावि
त्रौ दक्षिण भुजाग्रहस्ते ॥ अर्यमा ॥ स कूर्परे वाम भुजे सोम भल्लाट मुख्य ना
गरोगइतिपंच ॥ प्रकोष्ठे ॥ रुद्रराज यक्ष्माच ॥ वाम भुजाग्रहस्ते पृथिवीधरः ॥

रेषेरीशानदिङ्भागे ६ ...षाब्रित प. ...लक्षल यमगं धर्व मंगराजा शिखद्

स्तनयोः शर्वः॥उदरे ब्रह्मा॥दक्षिणपार्श्वे विवस्वान्॥वामपार्श्वे मित्रः॥मेढ्रे विबु

धाधिपः॥ वृषणे जयः॥ लिंगे मृगः॥ दक्षिण जंघायां सुग्रीवपुष्पदंत वरुणा

सुर शोषपाप रोगाइति षट्॥पादयोः पितामहः॥इति देवता न्यासः॥यस्मा

त्देहे गे विवसंति देवा तस्माद सौ वास्तुरिति प्रसिद्धः॥ सदैव पूज्यः प्रतिवर्ष

मेष नरैर्गृहे सर्वमनोरथाप्त्यै॥१॥ अथ वास्तु वास्तु पूजनपद्धतिः॥सुनिर्मि

ते प्रशस्त देशे भूमिं परिक्ष्य गोमयादिना उपलिप्य पिष्टा तैनाः कुंकुमहरिद्रादिना

वास्तुमंडले दक्षिणान उदगायतः समतरालाः दश रेखाः ॥ स्त्रोतथैव रेखा

परि पूर्व पश्चिमायताः समंतरालाः दश रेखाः ... सहस्रयविनलिख पं

सं मितं चतुरस्रं एकाशीतिपदं वास्तुमंडलं कृत्वा वक्ष्यमाणतत्तत्पद

विभागे ननमध्ये पंच चत्वारिंशद्देवता स्थापनं॥तद्यथा॥मध्ये नवपदे ब्र

ह्मा नतत्पुरस्त्रिपदोऽर्यमा॥सविता दक्षिणे न द्विवस्वान् पश्चिमे तथा॥विबुधा

धिपतिस्तस्मादुत्तरे त्रिपदान्वितः॥विंशतिस्ते कपदी कास्तावंतो द्विपदास्मृ

ताः॥ अस्यार्थः॥मध्ये नवपदस्थित ब्रह्मणः पुरस्तादेव पूर्व भागे र्यमणं त्रि

पदं स्थापयेत्॥एवमेव ब्रह्मणः पुरस्ताद्दक्षिण भागे सवितारं त्रिपदं सं

पूजयेत्॥एवमेव ब्रह्मणः पश्चिम भागे विवस्वंतं त्रिपदं स्थापयेत्॥एवमेव ब्र

ह्मणोत्तर वाम भागे विबुधाधिपतिं त्रिपदं स्थापयेत्॥ततः ईशानकोण

८

दारभ्य प्रादक्षिण्येन द्वात्रिंशन्मंडलांतःकोष्ठेषु द्वात्रिंशद्देवतास्थापनं परि
तः क्रमेण कुर्यात्॥ तद्यथा॥ शिखि चैवाथ पर्जन्यो जयंतः कुलिशायुधः॥
सूर्यः सत्यो भृशश्चैव आकाशो वायुरेव च॥९॥ पूषा१०॥ च वितथ११ श्चै
व गृहक्षत१२ यमायुभौ१३॥ गंधर्वो१४ भृंगराज१५ श्च मृगः१६ पितृगणा१७ १८
स्तथा॥ दौवारिको१९ सुग्रीवा२० पुष्पदंतो२॰ जलाधिपः२१ असुर२२ शेष२३
पापो२४ च रोगो२५ हि२६ मुख्य२७ एव च भल्लाट२८ सोम२९ उरगा३०
नाथो च३१ दितिर्दिश्चानिमेव च॥ एवं द्वात्रिंशद्देवतास्थापनं परितः
कुर्यात्॥ अथेशानादिचतुःकोणेष्वापाद्याःस्युःपदेषु च॥ आप श्च सावित्र

१२ ८

श्चैव जयंतश्चेंद्र इति क्रमात्॥ तत आपपदाद्योऽन्तर्नवपदे चतुःकोणेषु क्रमेणे
शानादिषु आपवत्सामित्र राजयक्ष्मपृथ्वीधराणां एकपदेषु पूजयेत्॥ इति वि
ंशत्परवाल शान्ते उमत्वात्॥ एवं पंचचत्वारिंशद्देवतास्थापनं मंडलमध्ये कु
र्यात्॥ ततः मंडलाद्बाह्यतः ईशानादिचतुःकोणेषु क्रमेण चरकी च विदारी च पू
तनापापराक्षसी॥ ईशानादिक्रमेणैव पूजयेच्च चतुष्टयं॥ इत्यष्टौ॥ ततः मंड
लाद्बाह्यतः पूर्वादिचतुर्दिक्षु क्रमेण॥ यथा॥ स्कंदमर्यमणौ चैव जंभकं पिलिपि
च्छकं॥ पूर्वादिक्षु चतुर्दिक्षु स्थापयेत्॥ मंडलाद्बहिः॥ ततो मंडलाद्बाह्यतः॥
अष्टदिक्षु पूर्वादिक्रमेण इंद्राद्यष्टलोकपालान् स्थापयेत्॥ उक्तं च॥ मंड

घाघ

१४ व दि

१५

लं द्वास्थतः स्थाप्यं द्वाघा लोकपालाव ॥ पूर्वादिदिक्षु नैपूज्या वास्तुपी
ठे सुरवासये ॥ लनः उग्रशनो भवेन्द्र प्राच्यां दक्षिणस्यां तु अमरः ॥ पश्चिमस्यां
महाकाल । एवं पादस्य थोत्तरो ॥ तथः पीठात् पूर्वे हेतु कस्यात् आग्नेये
त्रिपुरान्तकः दक्षिण्येयाम अग्निवेताले अग्निजिह्व तु नैऋते । कामश्च पश्चि
मे प्रोक्ते । न्वायव्यां तु करालकः धेनुर्धरस्तु सौम्यायां इशान्यां भीमरूप
कः आकाशे मधुराप्रोक्तः ॥ पाताले गंधमालिकः ॥ एतादेवा समाख्याता
समंताद्वास्तुमंडले ॥ एवं वास्तुमंडले देवेतात्स्थापनं छुत्वा ॥ ब्राह्मणमा

१६

हैन छुत्वा सिरिविनवा क्रमेण तु पूजयेत् ऊंघ पूर्वा घे प्रणवो घेर्नमोन्तके ॥
तिसर्वत्र ॥ उपहारांश्च होमांते । ऊंफं च ॥ होमांते भक्ष्य भोज्यानि वास्तुदे
शे बलिं हरेत । तु दधि शेषनैवेद्यामिदद्या क्रमेण तु ॥ प्रथुनमनुसराम ॥
अन्नाय पूजा कर्मेः ॥ तद्यथा ॥ पुजोपकरणान्यानि यस्त्वदक्षिण भागे निधाय
ले शंकुनादायाग्नेयादि क्रमेण ॥ विशंतु भूतले नागा लोकपालाश्च स
वेशः ॥ मंडले ऽत्रावलि हृं तु आयुर्बलकराः सदे तिमंत्रेण शंकुरोपये
र ॥ ततो बलिः ॥ अग्निभ्यो थ सर्पेभ्यो य चान्ये ता समाश्रिताः ॥ तेभ्यो बलिं
प्रयच्छामि पुण्यमोदनमुत्तमं ॥ इति बलिमंत्रः ॥ प्रति शंकुरोपणे एवं बलिदाने

ति॰ ३ विशेष:॥ नैर्‌त्याधिपश्चैव वैनै३त्यायेच राक्षसा:॥ बलिं नेभ्य: प्रयच्छामि सर्वे
गृह्णंतु मंत्रितं॥ २॥ उ॰ नमो वायुवर्दस्येभ्यो ये चान्ये तां समाश्रिता:॥ बलिं॰ पुष्प॰
मं॥ ३॥ रुद्रेभ्योथ सर्पेभ्यो ये चा॰ ना:॥ बलिं॰ गृह्णंतु स्वतनोत्सुका:॥ तनोरक्षा
पूजनं तथा॥ मनोरथायै नम:॥ १॥ सुभद्रायै नम:॥ २॥ सुनंदायै॰ ३ सुनायै॰ ४
सत्यैन॰ ५ प्राणायै न॰ ६ विशालायै॰ सुकांत्यै॥ ८ यशोधारायै ९ शांत्यै १० इति
प्राक्‌ संस्थाद वस्त्रा:॥ तथा॥ उदक्‌ संस्थाग्प्राग्ग्रा:॥ ज्या लायै॰ १ विहिता
यै॰ २ विजायायै॰ महाश्रियै॰ ४ सुनिर्मलायै ५ भूत्यै ६ अनंतायै ७ लक्ष्म्यै ८
प्रभायै ९ हिरण्यायै १०॥ इति रेखापूजनं॥ अथ चतु:कोणयुते वास्तुशरीरे

क्रमेण देवतान्यास:॥ मूर्ध्नि अग्नये नम:॥ मुखे आपाय॰ नेत्रे अदितये॰ कु
क्षि शायुधाय॰ कर्णयो:॥ अदितये॰ जयंताय॰ हृदये आपवत्साय॰ बा
हू मूलादारभ्य कूर्परांते। सूर्याय॰ सत्याय॰ भृशाय॰ आकाशाय॰ वायवे॰
प्रकोष्ठे॥ सवित्रे॰ सावित्राय॰ हस्ताग्रे अर्यम्णे॰ वामबाहूमूलादारभ्य कूर्परां
ते॥ सोमाय॰ भल्लाटाय॰ अहिने॰ मुख्याय॰ नागाय॰ रोगाय॰ प्रकोष्ठे॥
रुद्राय॰ राजयक्ष्मणे॰ करान्ग्रे पृथिवीधराय॰ आस्तनयो: शर्वाय॰ उदरे
ब्रह्मणे॰ दक्षिणपार्श्वे विवस्वते॰ वामपार्श्वे मित्राय॰ मेढ्रे विबुधाधिपतये॰
वृषणे जयाय॰ लिंगे मृगाय॰ दक्षिणजंघे पूष्णे॰ वितथाय॰ गृहक्षताय॰

यमाय॰ गंधर्वाय॰ भृंगराजाय॰ दक्षिणजंघे। नितंबे। दौवारिकाय॰ वाम
जंघे। सुग्रीवाय॰ पुष्पदंताय॰ वरुणाय॰ असुराय॰ शोषाय॰ पापाय॰ रो
गाय॰ पादयोः पितामहाय नमः॥ इति देवतान्यासः॥ मध्ये पंकजे मंडूका

१०

दिपीठदे॰ जेयत्र॥ पद्ममध्ये मंडूकाय॰ कालाग्निरुद्राय॰ कूर्माय॰ वराहाय॰ अ

१०

नंताय॰ पृथिव्यै॰ स्कंदाय॰ अंकुशा॰ नीलाय॰ पद्माय॰ पत्रेभ्यः॰ केसरेभ्यो॰ क
र्णिकायै॰ सिंहासनाय॰ अपपूर्वादि ४ धर्मा॰ ज्ञा॰ वैरा॰ ऐश्व॰ विदिक्षु॰ अध
र्मा॰ अज्ञा॰ अवैरा॰ अनैश्व॰ पद्ममध्ये १ सत्वाय॰ शुद्धवर्णाय॰ रं रजसे॰ रक्तव

१८

र्णं तमसे॰ कृष्णव॰ अग्निमंडलाय॰ सोममंडलाय॰ सूर्यमं॰ आत्मतत्वाय॰ केलं॰

विद्यात॰ शिवत॰ आत्मने॰ अंतरात्मने॰ जीवात्मने॰ परमा॰ पद्मस्य पूर्वादि अणि
म्ने॰ महिम्ने॰ लघिम्ने॰ गरिम्णे॰ प्राप्त्यै॰ प्राकाम्यै॰ ईशित्वाय॰ वशित्वायै॰ पद्ममध्ये॰
सर्वसिध्यै॰ सर्वज्ञानक्रियात्मने नमः अव्यक्तरूपात्मने॰ योगपीठाय नः इति
पीठदेवतागंधादिपूजयेत्॥ अथपूजाक्रमः॥ सयथा॥ हस्ते अक्षतान् गृही

२०

त्वा। प्रारिप्सितप्रतिष्ठादेवस्य हेवनस्य च॥ निर्विघ्नेन समाप्त्यर्थं वास्तुदेवपू
जयाम्यहं॥ अथावाहनं॥ श्लो॥ एह्येहि वास्तोऽखिल भूतपाल स्थूरासुरेः सेवि

३

तपादपद्म॥ पीठेऽद्य देवेंद्र गृहाण पूजां मनोरमां चारुभवे अमरत्व॥१॥ नमोवास्त्या
येत्यावाहनं॥ एषवै प्रतिष्ठा॥ मूलानामधिपं देवं सर्वभूतेषु वस्थितं॥ सर्वभू

११

नमयंदेवंवास्तुं वैपूजयाम्यहं ॥२१॥ वास्तोष्पते• वास्तोष्पतये नमः गंधादि• ॥ स
र्वत्रविशेषोपहारेहि मांते ॥ अथमंडलात वहिंपंचचत्वारि शद्देवतानं आदि
क्रमेणशिरस्यादि क्रमेणवा ॥ आवाहयाम्यहं देवं सर्वबालूषवरिस्थलं ॥ जगतो
त्यसमुत्पत्ति स्थिति संहारकारकं ॥ एह्येहि विप्रेंद्र पितामहेहि शांह साधिरूढ त्रि
दशेदेवंघ ॥ श्वेतोत्पलो भासकुशाब्जोहस्तग्रहाणपूजां भगवन्नमस्ते ॥ मध्यप
दे नवके देवा स्तोहं भाम्यां ॐ भूर्भुवःस्वः ब्रह्मन्निहागच्छ ब्रह्मजज्ञानं ॥ रक्तव
र्णे ब्रह्माणं आवाहयामि ॥ सुवर्णादि सल्लक्षणां यथाशक्ति प्रतिमां स्थापयेत् ॥
गंधादिपूजयेत् ॥ ततो ब्रह्मणो व्यवहित पूर्व भागे ॥ आवाहयाम्यर्यमणं देवं त्रै

२१

लोक्यदीपकं ॥ शुद्धस्फटिक संकाशं तेजोराशिं जगत्पतिं ॥ समागध्य
र्यमं देवं वास्तुपीठमलंकुरु ॥ पूर्वपदत्रयोदक्षिणतने अर्यमणं बृहस्प
तिं ॥ श्वेतवर्णमर्यमणं आवा• ॥२॥ ततो ब्रह्मणो व्यवहितदक्षिणतो
गे पदत्रये ॥ देवदेव जगन्नाथ सविता क्रौंचपालक ॥ त्रैलोक्यमंडपेदीप
सर्वव्याधिविनाशन ॥ पूजां गृहाण देवेश वास्तुपीठमलंकुरु ॥ स
विताप्रथमेह्नीति त्रिपदं सवितारं पूजयामि ॥२॥ ब्रह्मणो व्यवहि
त पश्चिमभागे ॥ रक्तांबरं पद्महस्तं विवस्वंतं प्रभाकरं ॥ सर्वपापहरं दे
वमजमावाहयाम्यहं ॥ विवस्वानादित्य• त्रिपदं विवस्वंतं पूजयामि ॥४॥

२२

ब्रह्म॰उत्तरे भागे॥ आवाहयाम्यहं देवं विबुधाधिपतिं प्रभुं॥ ऐरावतस्थं
समारूढं हेमाद्रिशिखरोपमं॥ देवराज त्वमागच्छ वास्तुपीठमलंकुरु॥
यज्ञाम इति त्रिपदं विबुधाधिपतिं पूजं॥५॥ ततः ईशानकोणादारभ्य
प्रादक्षिण्येन समंततः॥ मंडलांतर्वर्तिद्वात्रिंशत्कोष्ठेषु द्वात्रिंशद्देवताः
पूजयेत्॥ आवाहयामि देवेशं शिखिनं चामहोज्ज्वलं॥ मेषारूढं सप्तजि
ह्वं पावकं निधिवर्द्धनं॥ ओ देव त्वमागच्छ वास्तुपीठमलंकुरु॥ चत्वारि
शृंगेति ईशानकोणस्थितं एकपदं शिखिनं पूजयामि॥६॥ एह्येहि जी
मूतस्थाप्रवर्षैः चराचरैः सेवितपादपद्म॥ पीठे त्वदेवेश गृहाण पूजां

ममाध्वरं पाहि नमो नमस्ते॥ सुपर्णः पार्जन्य इत्येकपदं पर्जन्यं॥७॥ एह्ये
हि देवेश जयंत राज शचीपते शक्र सुरैश्च सेव्य॥ पीठे त्वयज्ञेश गृहाण
पूजां शिवाय नः पाहि नमो नमस्ते॥ महाइंद्र इति द्विपदं जयंतं॥८॥ एह्ये
हि देवेंद्र गजाधिरूढ सहस्रनेत्राद्रिदशैकवंद्य॥ शचीपते शक्रसुरैनि
त्यं गृहाण पूजां मम मंगलं नमस्ते॥ इंद्रः सुत्रामेति द्विपदं कुलिशायुधं॥९॥
आवाहयामि द्युमणिं द्विभुजं पद्मलोचनं॥ सप्ताश्ववाहनं देवं ग्रहाधि
राजं सुरोत्तमं॥ आगच्छ भगवान्सूर्य वास्तुपीठमलंकुरु॥ बट् सूर्येति द्वि
पदं सूर्यं॥१०॥ एह्येहि सत्येश ममहामहेश दुष्टांतक स्वस्थ सं सूर्यामर्तें॥

पीठे त्र देवेश गृहाण पूजां मनोरमां चारु भव नमस्ते ॥ ऋतं श्च सत्यश्चे
निधिपदं सत्यं ॥११॥ आवाहयामि देवेशं नसां नीलोत्पलद्युतिं ॥ देवसे
नासमायुक्तं शक्तिपाणिं महाबलं ॥ भो नशलत्वमिहागच्छ वास्तुपीठमलं
कुरु ॥ मायैदार्वीसारं द्विपदं ... ॥१२॥ आवाहयिष्ये लोकाशं विष्णोः
पदमनन्तकं ॥ यत्र देवाश्च लोकाश्च ग्रहाः सर्वे प्रतिष्ठिताः ॥ आगच्छ
गवाक्षाव वास्तुपीठमलं कुरु ॥ ऊर्ध्वो आत्यये त्वे कूपदं आकाशं ॥१३॥
आवाहयामि देवेशं जगत्प्राण सदागतिं ॥ सर्वाधारं महावेगं वायुं ग
घवहप्रभुं ॥ भो वायो त्वमिहागच्छ वास्तुपीठमलं कुरु ॥ वायो यते इति

१२

२५

१३

आग्नेय कोणस्थमेकपदं गायु ॥१४॥ एत्स्यो हि पूषन्भूविचारदक्षहत्याधिरूढा रवि लेघ
र्ममूर्ते ॥ पीठे त्र देवेश गृहाण पूजां शिवाय नः पाहि भव नमस्ते ॥ पूषं रेलवेत्येकपदं पूषाणं ॥१५॥
आवाहयाम्यहं देवं वितथं रमलेक्षणं ॥ शूलहस्तं मृगारूढं वरेण्यमभयप्रदं ॥ समाग
च्छमहावाहो वास्तुपीठमलं कुरु ॥ निरिश्चिनो वितरलिद्विपदं वितथं ॥१६॥ एत्स्यो हि लोके
श्वर धर्ममूर्ते गृहक्षेत्रेशस्फूर्तिवद्भिरूपा ॥ पीठे त्र देवेश गृहाण पूजां मनोरमां चारु भ
व नमस्ते ॥ यामेधामिलिद्विपदं गृहक्षतं ॥१७॥ एत्स्यो हि दंडायुध धर्मराज कालाजनाभ
सविशाल नेत्र ॥ पीठे त्र देवेश गृहाण पूजां श्रीं नय स्मात्तुल्ले जानसमयारः ॥ अति
यमइति द्विपदं यमं ॥१८॥ एत्स्यो हि गंधर्व सुरप्रियेश गौरेश चनाभात्स्वर्धर्ममूर्ते ॥ पीठे
त्र देवेश गृहाण पूजां ममाध्वरं पाहि भव नमस्ते ॥ गंधर्व लिद्विपदं गंधर्वं ॥१९॥ आवा

न

२६

ध

१७

ह्यामि देवेशं मृगराजं महाबलं ॥ अ(?)यामास्य रूपं च सृष्टिसंहारकारकं ॥ आगच्छ मृ-
गराज त्वं पीठेस्मिन् सन्निधौ भव ॥ प्रआपलेति लिखित्पदं ॥ मृगराजं ॥ २० ॥ एह्येहि बाल-
अनादि व्यक्तरूप मृगमस्त शार्दूलि हरासराशे ॥ पीठे अत्र देवेश गृहाण पूजां मम माध्वेश्वारि म-
वे नमस्ते ॥ पुरुषमृगश्चांद्रमसे तिलि एव पदं मृग ॥ २१ ॥ एह्येहि यज्ञेममरक्षणाय पीतृ श्रृं-
ति नामि हृपारद शीनूं ॥ स्वधे अपीठे अग्रहाण पूजां मनोरमां चारु भवं नमस्ते ॥ उदीरता-
मिति लिखित्वाऽलि कोणास्थिते नमेव पदं पितरं पू. ॥ २२ ॥ एह्येहि दौवारिकेदं डपाणे विशा-
लपवे रुह लोलु नेत्र ॥ पीठे अ. शिवायनः पाहि भव नमस्ते ॥ ऊर्ध्वं विणो दाइति एवं पदं
दौवारिकं ॥ २३ ॥ एह्येहि सुग्रीव सुरेश पूज्य गाढिवहस्त त्रिगुणात्ममूर्ते ॥ पीठे अ. मा-
नोरमां चारु भव नमस्ते ॥ नत्योत्सत्य सवैइति लिखित्पदं सुग्रीवं ॥ आवाहयामि दे-

१८

२६

स

वेशं पुष्पदंत महोज्वलं ॥ नानाविभवसंपन्नं महाघराविराजितं ॥ पुष्पदंत त्वमागच्छ
वास्तुपीठे मलं कुरु ॥ याः फलिनीरिति लिखित्पदं पुष्पदंतं ॥ २५ ॥ एह्येहि लोकेश्वरपाशपा-
णे यादोगणैर्वंदित पादपद्म ॥ पीठे अत्र देवेश गृहाण पूजां पाहि त्वमस्मान् भगवन्नमस्ते ॥
वरुणः स्त्राविले लिखित्पदं वरुणं पू. ॥ २६ ॥ आवाहयामि दैत्येंद्रमसुरं सुरमर्दनं ॥ उग्र-
रूपं महावीर्यं खड्गपाणिं धनुर्धरं ॥ असुर त्वमिहागच्छ वास्तुपीठमलं कुरु ॥ येरूपा-
णीति लिखित्पदं असुरं ॥ २७ ॥ एह्येहि नागेंद्र धराधरेश सर्वामरैर्वंदित पादपद्म ॥ नाना-
रूणामंडलराजमान गृहाण पूजां भगवन्नमस्ते ॥ नमोस्तु सर्पेभ्य इति लिखित्पदं शेषं ॥ २८ ॥
आवाहयाम्यहं नीलं पापं रोगं महाबलं ॥ कुशलं चाक्षमायुक्तं दंडमुद्गरधारिणं ॥
पापयक्ष्मन्निहागच्छ वास्तुपीठमलं कुरु ॥ अग्ने युक्ष्वाहीत्येव पदं पापं ॥ २९ ॥ ओं ध्या(?)

२८

याम्यहं पीठे रोगं रोगहरं परं ॥ दंष्ट्रामुष्टरसंयुक्तं नानालंकारभूषितं ॥ हे रोग त्वं समा
गच्छ वास्तुपीठमलंकुरु ॥ सधमादो द्युम्नी निरिति वायव्यकोणस्थितमेकपदं रोगपू०॥२०॥
आवाहयामि देवेशं पातालाधिपतिं विभुं ॥ पन्नगादिसमायुक्तं मणिरत्नविभूषि
तं ॥ नागराज त्वमागच्छ पीठेस्मिन् सन्निधौ भव ॥ यार्ष्टिव इत्येकपदं नागपू०॥२१॥ आ
वाहयाम्यहं देवं मुख्यं जीमूतसंनिभं ॥ इंद्रासनसमारूढं देवगंधर्वसेवितं ॥ मुख्य
त्वं हि महागच्छ पीठेस्मिन् संनिधौ भव ॥ ब्रह्मणे ब्राह्मणमिति द्विपदं मुख्यं ॥२२॥
आवाहयाम्यहं देवं भल्लाटं मकरध्वजं ॥ त्वं हि महाभीमं स्फटिकाद्रिसमप्रभं ॥
भल्लाट त्वमिहागच्छ वास्तुपीठमलंकुरु ॥ वीमोसा ये इति द्विपदं भल्लाटं ॥२३॥ एह्ये
हि ताराधिप नेत्रसूरे शश्वेतोत्पलाभास सुधाकरेश ॥ द्विजेशपीठे ग्रहाणपूजां

ममाध्वरं पाहि नमो नमस्ते ॥ सोमो धेनुमिति द्विपदं सोमं ॥२४॥ आवाहयामि तं देवं
भुजगं च महाबलं ॥ धराधरं महाभीमं नानारत्नविभूषितं ॥ आगच्छ त्वं महाभाग पी
ठेस्मिन् सन्निधौ भव ॥ उरुंहि राजेति द्विपदं उरगं ॥२५॥ आवाहयाम्यहं देवीमदितिं
देवमातरं ॥ सर्वकामप्रदां शुभ्रां मखविघ्नविनाशिनीं ॥ देवमातरमिहागच्छ
पीठेस्मिन् संनिधौ भव ॥ अदितिर्द्यौरिति द्विपदं मदितिं पू०॥२६॥ आवाहयाम्यहं
देवीं दितीं दैत्यस्य मातरं ॥ सर्वांगसुंदरां रम्यां महामोहकरीं शुभां ॥ समागच्छात्र
यसेस्मिन्वास्तुपीठमलंकुरु ॥ अदितिर्द्यौरित्येकपदं दितिपूजं०॥२७॥ नमः शि
खिपदाद्यलनेपदेषु चतुःकोणेषु ईशान्यादारभ्य क्रमेण आपसावित्रजयरुद्रा
णां चतुर्णामेकपदानां पूजयेत् ॥ तद्यथा ॥ आपस्त्वावाहयिष्यामि सर्वांगावरदाः
शुभाः ॥ आपस्त्वा यांतु वरदाः पवित्रा मंगलावहाः ॥ आपो अस्मानिति शिव

१६

पदादधः एकपदे आपः पू०॥३८॥ आवाहयिष्ये वरदं सावित्रं मिहिरप्रियं ॥ तेजोमू
र्तिं दुराधर्षं भक्तानामभयप्रदं ॥ सावित्र त्वमागच्छेहि वास्तुपीठमलंकुरु ॥ उपयामगृ
हीतोसि सावित्रोसि चनोधायुपदादधः आग्नेयकोणे एकपदं सावित्रं ॥३९॥ आवाह
यामि तं देवं जयं जयकरं परं ॥ हयारूढं समाबाहुं नानालंकारशोभितं ॥ आगच्छ भग
वञ्जय त्वं वास्तुपीठमलंकुरु ॥ त्वामिन्द्र इति त्रिपदादधः नैर्ऋत्ये एकपदं जयं पू०॥४०॥
रुद्रेहि हि विश्वेश्वर नः त्रिशूलकपालखट्वांगधरेण सार्द्धं ॥ लोकेश भूतेश्वर यज्ञसि
द्ध्यै गृहाण पूजां भगवन्नमस्ते ॥ इमा रुद्रायेति तोगपदादधः वायव्यकोणस्थितं एक
पदं रुद्रं पू०॥४१॥ आपपदादधः पदे चतुःकोणेषु क्रमेणैशानादिषु च आपवत्समि
त्रराजयक्ष्मपृथ्वीधराणां एकपदेषु पूजयेत् ॥ तद्यथा ॥ आवाहयाम्यहं देवमापव
त्समहाबलं ॥ मयूरवाहनं रौद्रं नानाभूषणभूषितं ॥ आपवत्स त्वमागच्छ वास्तुपीठ

१६

३१

मलंकुरु ॥ आपो हि ष्ठेत्यापपदादधः ईशानकोणस्थितं एकपदं आपवत्सं ॥४२॥ आवा
हयामि तं देवं मित्रं समाश्ववाहनं ॥ रत्नांबरधरं लीलं मित्रं सर्वघ्नं परं ॥ आगच्छ भगवा
न्मित्र वास्तुपीठमलंकुरु ॥ मित्रस्य चर्षणीधृत इति सावित्रपदादधः आग्नेयकोण
स्थितं एकपदं मित्रं पू०॥४३॥ आवाहयामि तं देवं राजयक्ष्माणमद्भुतं ॥ त्रिशिरस्कं महा
घोरं नागयज्ञोपवीतिनं ॥ समागच्छ महाबाहो वास्तुपीठमलंकुरु ॥ या ते हेतिरिति
जयपदादधः नैर्ऋत्यकोणस्थितं एकपदं राजयक्ष्माणं पू०॥४४॥ आवाहयामि तं
देवं पृथ्वीधरमतींद्रियं ॥ शंखचक्रगदापद्मधरं लंबचतुर्भुजं ॥ पृथ्वीधर त्वमाग
हि वास्तुपीठमलंकुरु ॥ हिरण्यगर्भ इति रुद्रपदादधः वायव्यकोणस्थितं एकपदं
पृथ्वीधरं पूजयेत् ॥४५॥ इति वास्तुमंडलांतर्गर्भे पंचचत्वारिंशद्देवान्पूजयेत् ॥

३२

१८

ततः उत्तरे रक्षवास्तुपू० १ वास्तोष्पते प्रति जानीह्यस्मानिति मंत्रेणास्थापयेत् ॥ त्व
चे त्वर्णस्य रोप्यस्य वा ॥ अथ मंडलाद्बाह्यतः ॥ ईशानादिक्रमेण देवतापूजनं ॥
चरकी च विदारी च पूतनापापराक्षसी ॥ ईशानादिषु कोणेषु राक्षसीनां चतुष्ट
यं ॥ नघपा । महोग्रे देवी चरकी देवी नोमयंकरिणी ॥ समागच्छ महाभागे वास्तु
पीठमलंकुरु ॥ अदितिश्चेति ईशान्ये चरकी ॥ १ ॥ विदारणं करे दक्षे निशाचरवर
प्रिये ॥ समागच्छ नमामि त्वां वास्तुपीठमलंकुरु ॥ अग्निं दूतमिति आग्नेय्यां विदारीं ॥ २ ॥
लक्ष्के वेरधरे देवी स्वसा वे सासरस्य च ॥ राक्षसीत्वं समागच्छ वास्तुपीठमलंकुरु ॥
देहस्वेति नैरृत्ये पूतनां पू० ॥ ३ ॥ पापा चरलो देवी पापरूपशरीरके ॥ देवमान
वविद्रावी अनर्त्य पापराक्षसी ॥ समागच्छ महादेवी वास्तुपीठमलंकुरु ॥ अदिति

३२

र्द्यूति वायव्ये पापराक्षसीं ॥ ४ ॥ ततो मंडलाद्बहिरेव पूर्वादिषु चतुर्ष्वपि दिक्षु क्रमे
ण ॥ आवाहयामि देवेश त्वं दैत्यनिषूदनं ॥ समागच्छ देवेश वास्तुपीठमलंकुरु ॥
यद् क्रंद इति पूर्वे स्कंदं ॥ १ ॥ आवाहयामि देवेशं मर्यमाणं कूरं महाबलं ॥ समाग
च्छामि देवेश वास्तुपिठमलंकुरु ॥ अर्यमणं ब्रहस्पति० दक्षिणे अर्यमणं पू० ॥ २ ॥
आवाहयाम्यहं देवं जंभकं सर्वसाक्षसं ॥ समागच्छाद्य देवेश वास्तुपिठमलं
कुरु ॥ अयं वेन इति पश्चिमे जंभकं पूजये० ॥ ३ ॥ आवाहयाम्यहं देवं पिलिपिच्छ म
हाबलं ॥ समागच्छाद्य देवेश वास्तुपीठमलंकुरु ॥ वास्त्विदासि दिव्यनरेति पिलि
पिच्छं ॥ ४ ॥ तथैव पूर्वादिक्रमेण ॥ आवाहयाम्यहं देवं महावीर्यं महानलं ॥ उग्र
सेन समागच्छ वास्तुपीठमलंकुरु ॥ उग्रं भीमश्चेति पूर्वे उग्रसेनं ॥ १ ॥ आवा

च्य

३४

१९

यामिदेवेशंडमरंसर्ववंशमदं ॥ समागच्छात्रपीठेस्मिन्वाल्ह० ॥ आयुधंत्रयेस्यंद
क्षिणेडमरं ॥२॥ आवाहयामिदेवेशंसर्वमंगलमयंकरं ॥ महाकाल समागच्छवी
रूपी० ॥३॥ मेषुणाइलिपश्चिमेमहाकाले ॥४॥ आवाहयाम्यहंदेवमायुधैः
समलंकृतं ॥ समागच्छात्रपीठेस्मिन्धनुर्धरनमोस्तुते ॥ वयं सोमेस्यसरेध
नुर्धरं ॥५॥ लतोमंडलाद्वहिरेवपूर्वादिअष्टदिक्षु क्रमेण ॥ आवाहयामिदेवे
शंहेतुकंपीठसंस्थितं ॥ हेतुकत्वमिहागच्छ वाल्हपीठमलंकुरु ॥ यातेहेतीरि
निपूर्वेहेतुकं ॥ पीठकं च ॥१॥ आवाहयामिदेवेशं त्रिपुरान्तकरंप्रभुं ॥ समाग
च्छाग्रेदेवेशवाल्ह० ॥ नमः शंभवायेति आग्नेत्रिपुरान्तकं ॥२॥ आवाहयाम्य

३५

हं देवं अग्निवेतालमद्भुतं ॥ समागच्छात्रपीठेस्मिन्वाल्हपी० ॥३॥ वेदोसीतिदक्षि
णेअग्निवेतालं ॥३॥ आवाहयामिदेवेशं पावकं मंगलप्रदं ॥ अग्निजिह्व
समागच्छ वाल्ह० ॥ अग्नेपावकेतिनैरृत्ये अग्निजिह्वं ॥४॥ आवाहयामि
देवेशं कालरूपधरं विभुं ॥ समागच्छात्रपीठेस्मिन्रवोवाल्ह० ॥ कार्षिरसीति
पश्चिमे कालं ॥५॥ आवाहयाम्यहं देवं करालं व्याघ्ररूपिणं ॥ समागच्छात्रपी
ठेस्मिन्वाल्ह० ॥ यमायसोमेति वायव्ये करालं ॥६॥ आवाहयामिदेवेशं भैरवं पा
दे महाबलं ॥ समागच्छात्रपीठेस्मिन्वाल्हपी० ॥ उलनोरिहर्बुध्नइलिउसरेप
एकपादं ॥७॥ भीमरूपमहाबाहो दीर्घदेह महाबलं ॥ समागच्छात्रपीठेस्मि

३६

वालरूपी० अमितवाश्वरनो नुमइतिईशान्येनीमरूपं ।।१०६।। नमस्ते दि
क्षिपूर्वादिदिक्षु क्रमेण लोकपालान् स्थापयेत् ।। एह्येहि सर्वामरसिद्ध
साध्यैरभिष्टुतो वज्रधरामरेश ।। संवीज्यमानो प्सरसां गणेन रक्षाध्व
रं नो भगवन्नमस्ते ।। त्रातारमिंद्रमिति पूर्वे इंद्रं ।।१।। एह्येहि सर्वामरहव्य
वाह मुनिप्रवीरैरभितोभिजुष्ट ।। तेजोवता लोकगणेन सार्द्धं ममाध्व
रं पाहि कवे नमस्ते ।। अग्निं दूतामित्याग्नेयां अग्निं ।।२।। एह्येहि वैवस्व
त धर्मराज सर्वामरैरर्चित धर्ममूर्ते ।। शुभाशुभानंद शुचामधीश ममा
ध्वरं पाहि शुभे नमस्ते ।। यमाय त्वेति दक्षिणे यमं ।।३।। एह्येहि रक्षो

११ ११

गणनायक त्वं विशालवेतालपिशाचसंघैः ।। ममाध्वरं पाहि पिशाच
नाथ लोकेश्वरस्त्वं भगवन्नमस्ते ।। असुन्वंतमिति नैर्ऋत्यां निर्ऋतिं ।।४।।
एह्येहि यादोगणवारिधीनां गणेन पर्जन्यसहाप्सरोभिः ।। विद्याध
रेंद्रामरगीयमान पाहि त्वमस्मान् भगवन्नमस्ते ।। तत्त्वायामीति पश्चिमे
वरुणं ।।५।। एह्येहि यक्षेश मरुद्गणानां मृगाधिरूढ सह सिद्धसंघैः ।। प्रा
णाधिपः कालकवेः सहाय ममाध्वरं पाहि भव नमस्ते ।। आनो नियुद्भि
रिति वायव्ये वायुं ।।६।। एह्येहि यक्षेश्वर यक्षरक्षाविधत्स्व नक्षत्रगणेन सा
र्द्धं ।। सर्वौषधीभिः पितृभिः सहैव पा ध्वरं नो भगवन्नमस्ते ।। सोमो
धे

३८ ३९

येनूमित्यनैसोमं ॥७॥ एह्येहि विश्वेश्वर शूलहस्तकपालपाणे वृषभमा
धिरूढ ॥ गौरीपते भूतपते सुरेश मामाध्वरं पाहि भवंनमस्ते ॥ नमि शान
मिति शान्यां रुद्रं ॥८॥ एह्येहि विश्वाधिपते सुरेंद्र लोकेन सार्द्धं पितृदे
वताभिः ॥ सर्वस्य धातास्यमितप्रभावो रक्षाध्वरं नो सततं शिवाय ॥ २०
अस्मिन्रुद्रेति ईशानपूर्वयो र्मध्ये ब्रह्माणं ॥९॥ एह्येहि पातालध
रामरेंद्र नागांगनाकिन्नरगीयमान ॥ रक्षोरगेंद्रामरलोकसार्द्धं अनंत
नरक्षाध्वरमस्मदीयं ॥ स्योना पृथ्वीति पश्चिमनैऋतयोर्मध्ये अनंतं
पूजयेत् ॥१०॥ वेचित्रमनेन इंद्रादिलोकपालानुपरउग्रसेनादि पूजयेत् ॥

२१

अपसेर्वेषामावाहनदेवतानां आसनाद्युपचारैः ॥ तांत्रानुसमयेन वा
स्तं संपूज्य ॥ एह्येहि भगवन्वास्तो गेहेस्मिन् सर्वसिद्धये ॥ नवपूज्याधि
वास्यामि गेहे विघ्ननिवृत्तये ॥ इत्यादिनैवेद्यांतपूजनं ॥ बलिदानं ॥ सांगा
यसपरिवाराय इत्यादिना बलिं दद्यात् ॥ भूमयज्ञ अधिकरुकुलसवेदे रू
हे श्योमा रक्ष रक्ष स्वाहा ॥ प्रार्थना ॥ वस्तोस्पतेग्रतीक्षस्त पूजां चैव बलिं मम ॥
नमो नमस्ते देवेश भवान्स्वास्तु वरे भव ॥ इति प्रार्थ्य ॥ शालामंडपस्य ईशान
भागे मंचे पूर्ववत्कलशं स्थाप्य तीर्थं न्या वास्तुं वरुणं वास्तुं संपूज्य च ॥
शिवं वास्तु शिवं वास्तु इति मंत्रैः शुद्धं ॥ ब्रह्मा नोद्भुत्वास्तु ॥ अस्तु इति श

स्थण : कूर्यात् ॥ ततः प्रादक्षिण्येन ईशानकोणादारभ्य ईशानपर्यंतं त्रिसू
त्रापावमानेन रक्षोघ्नेन वास्तुं चैव वेष्टयेत् ॥ ततो दुग्धपूर्णया जलपूर्णया
तत्र कुंभीन्याधाय पूर्वं तत्र हृदयेन अविच्छिन्नधाराहव्यं सिंचेत् ॥ प्रार्थनो द्वारे ॥

२१ यथा मेरुगिरेः शृंगं देवानामालयः सदा ॥ तथा ब्रह्मादिभिर्देवैर्मम यस्मिन्

स्थिरो भव ॥ १ ॥ पूजितोसि मया वास्तो गंधाद्यैरुपचारकैः ॥ प्रसीद पाहि विश्वेश देहि मे गृहजं सुखं ॥ २ ॥ इति वास्तुं प्रार्थ्य ॥ ततः कुंभं स्थंडिले वा तत्समा

श्रमे रक्तसूत्रेण तं तस्मात्तोवित्रागिनप्रक्षाप्य ॥ ततः मंत्रेः पूर्वदिग्भागे

ग्रहवेद्यां ग्रहस्थापनं कुर्यात् ॥ अथांतरे अग्निस्थापनोनंतरं ग्रहस्थापना

नंतरं वास्तुं पूजयेत् ॥ ततः शालाकर्म करिष्ये ॥ इति संकल्प्य ॥ ततः अ

न्वाधानं ॥ अग्निं १ अग्निं २ वास्तोष्पतिं ३ वास्तोष्पतिं ४ वास्तोष्पतिं ५ वा

स्तोष्पतिं ६ प्रजापतिं १ इंद्रं २ अग्निं २ सोमं ९ एता देवता आज्येनाहं यक्ष्ये ॥

अग्निं । इंद्रं । बृहस्पतिं । विश्वान्देवान् ॥ सरस्वतीं । वाजिनं । सर्पदेवजना

न् । हिमवंतं । सुदर्शनं । वसून् । रुद्रान् । आदित्यान् । ईशान् । जगदानां पू

र्वाह्णं । अपराह्णं । मध्यंदिनं । प्रदोषं । अर्धरात्रं । व्युष्टं देवीं । महापदं । धर्ता

रं । विधर्तारं । विश्वकर्माणं । ओषधीः ॥ वनस्पतीन् । धातारं । विधातारं ।

निधीनांपतिं । ब्रह्माणं । प्रजापतिं । एता देवता चरुणाहं यक्ष्ये । ततः

ग्रहान्। सूर्यं। सोमं। भौमं। बुधं। बृहस्पतिं। शुक्रं। शनिश्चरं। राहुं। केतुं। रुद्रं। उमां। स्कंदं। विष्णुं। ब्रह्माणं। इंद्रं। यमं। कालं। चित्रगुप्तं। अग्निं। अपः। धरां। विष्णुं। इंद्रं। इंद्राणीं। प्रजापतिं। सर्पान्। ब्रह्माणं। विनायकं। दुर्गां। वायुं। आकाशं। अश्विनीकुमारौ। इंद्रं। अग्निं। यमं। निर्ऋतिं। वरुणं। वायुं। कुबेरं। ईशानं। ब्रह्माणं। अनंतं। वास्तोष्पतिं। क्षेत्राधिपतिं। शेषं। वासुकिं। तक्षकं। कर्कोटकं। पद्मं। महापद्मं। शंखपालं। कंबलं। कुलिकं। अश्विन्यादि नक्षत्राणि। विष्कंभादि सप्तविंशति योगान्। बवबालव करणानि। गंगादि सप्त सरितः। सप्तकुलाचलान्। अष्टौ वसून्। एकादश रुद्रान्। द्वादशादित्यान्। एकोनपंचाशन्मरुतः। षोडशमातॄः। षष्टि संवत्सरान्। ऋतून्। द्वादशमासान्। द्वे अयने। पंचदश तिथयः। षष्टि संवत्सरान्। सुपर्णान्। नागान्। सर्पान्। यक्षान्। गंधर्वान्। विद्याधरान्। अप्सरसः। रक्षांसि। भूतानि। मनुष्यान्। पितृन् पीठः। शिवदेवता। वास्तोष्पतिः सिद्धेन चरुणा मधुसर्पिर्भ्यां यवैः। ... सिरसामिद्भिः। तद्भावे खादिरापामार्गकुशदूर्वामयान्यतमैः। ... निर्यां। विश्वेदेवीं। बीजे वौ। ब्रह्माणं। अर्यमणं। सवितारं। विवस्वंतं। दिबुधाधिपतिं। शिखिनं। पर्जन्यं। जयंतं। कुलिशायुधं। सूर्यं। सत्यं। भृशं।

४३

४४

आकाशं। वायुं। पूषणं। वितथं। गृहक्षतं। यमं। गंधर्वं। भृंगराजं। मृगं। पितॄन्।
दौवारिकं। सुग्रीवं। पुष्पदंतं। वरुणं। असुरं। शेषं। पापं। रोगं। नागराजं। मुख्यं। भ
ल्लाटं। सोमं। उरगं। अदितिं। दितिं। आपः। सावित्रं। जयं। रुद्रं। आपवत्सं। मि
त्रं। राजयक्ष्माणं। पृथ्वीधरं। चरकीं। विदारीं। पूतनां। पापराक्षसीं। स्कंदं। अ
र्यमणं। जंभकं। पिलिपिंछं। उग्रसेनं। डामरं। महाकालं। धनुर्धरं। हेतुकं। पीठ
कं। त्रिपुरांतकं। अग्निवेतालं। अग्निजिह्वं। कालं। करालं। एकपदं। भीमं। इंद्रं। अ
ग्निं। यमं। नैर्ऋतिं। वरुणं। वायुं। कुबेरं। ईशानं। ब्रह्माणं। अनंतं। एताद्दे
वतास्तिलाज्येनाहुत्यक्ष्ये। अग्निं स्विष्टकृतं हविःशेषेण। अग्निं वायुं।

सूर्यं अग्निवरुणौ अग्निवरुणौ। अग्निमयस॰ वरुणं सवितारं विष्णुं विश्वान्
देवान्। मरुतः स्वर्कान्। वरुणं। प्रजापतिमेताज्येन। एताद्देवता अंगप्रधा
नार्थं वास्तुयागाख्ये कर्मण्यहं यक्ष्ये।। ततः ब्रह्मासने। उत्तरत उदपात्रं।
प्रणीताप्रणयनादि न्यकृत्यसमिद्वितं प्रोक्षण्युत्पवनांतं कृत्वा।। उत्तवनं
ते गृहाद्बहिर्निःसृत्य। द्वारदेशे गृहाभिमुख्यं स्थित्वा। ब्रह्मन् प्रविशामीति
ब्राह्मणमामंत्र्य प्रविशस्वेत्यनुज्ञातः। ऋतं प्रपद्ये इति मंत्रस्य। ब्रह्माग्निः।
यजुः शाला देवता। शालाप्रवेशे विनियोगः। ऋतं प्रपद्ये। शिवं प्रपद्ये
इति मंत्रेण शालां प्रविशेत्। ततः स्वासने उपविश्य। उपयमन कुशानादा

यति वत्समिधो न्याधाय। पर्युक्ष्य जुहुयात्। तद्यथा। इहरतिरिति मंत्रस्या
घाउपस्त जनिरिति मंत्रस्य। ब्रह्मा ऋषिः। यजुः। अग्निर्देवता। आज्यहोमे वि-
नियोगः। इहरतिरिहरमध्वमिह धृतिरिह स्वधृति स्वाहा॥ इदमग्नये न मम।
ॐ उपसृजं धरुणं मात्रे धरुणो मातरं धयन्। रायस्पोषमस्मासु दीधरत्स्वा-
हा। इदमग्नये न मम। वास्तोष्पत इत्यादि चतुर्णां वसिष्ठ ऋषिः। आद्या-
नां तिसृणां त्रिष्टुप् छंदः। अंत्यायाः गायत्री छंदः। वास्तोष्पतिर्देवता। आ-
ज्यहोमे विनियोगः। वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो अनमीवो
भवा नः। यत्त्वेमहे प्रति तन्नो जुषस्व शंनो अस्तु द्विपदे शं चतुष्पदे स्वाहा॥

इदं वास्तोष्पतये न मम। वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभि-
रिंदो। अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व शंनो अस्तु
द्विपदे शं चतुष्पदे स्वाहा॥ इदं वास्तोष्पतये न मम॥ २॥ ॐ वास्तोष्पते शग्म-
या संसदा ते सक्षीमहि रण्वया गातुमत्या। पाहि क्षेम उत योगे वरं नो यूयं
पात स्वस्तिभिः सदा नः स्वाहा। इदं वास्तो॰ ३॥ ॐ अमीवहा वास्तोष्पते विश्वा रूपाण्या-
विशन्। सखा सुशेव एधि नः स्वाहा। इदं वास्तोष्पतये न मम॥ ४॥ आघारावा-
ज्यभागौ हुत्वा॥ ॐ प्रजापतये स्वाहा। इदं प्र॰। इंद्राय। इदमिं॰। अग्नये। इदं॰।
सोमाय। इदं॰। अथ चरुहोमः॥ अग्निमिंद्रमित्यादि षण्णां कुत्सः॥ अग्निमित्या

२५

द्विषण्णां मंत्राणां अथर्वण ऋषिः अनुष्टुप् छंदः लिंगोक्तादेवता। स्थालीपा
क होमे विनियोगः। ॐ अग्निमिंद्रं बृहस्पतिं विश्वान्देवानुप ह्वये। सरस्वतीं
च वाजीं च वास्तुमेदन वाजिनः स्वाहा। इदमग्नये इंद्राय बृहस्पतये विश्वेभ्यो
देवेभ्यः सरस्वत्यै वाजिन्यै च इदं न मम॥१॥ ॐ सर्पदेवजनान्सर्वान्हिमवं
तं सुदर्शनं। वसूंश्च रुद्रानादित्यानीशानं जगदैः सह॥ एतान्सर्वान्प्रपद्ये
हं वास्तुमेदन वाजिनः स्वाहा। इदं सर्पदेवजनेभ्यो हिमवते सुदर्शनाय व
सुभ्यो रुद्रेभ्य आदित्येभ्य ईशानाय जगद्भ्यश्च न मम।२। पूर्वाह्णमपरा
ह्णं चोभौ मध्यंदिना सह। प्रदोषमर्धरात्रं च व्युष्टां देवीं महापथां। एतान्स

२५

४९

र्वान्प्रपद्येहं वास्तुमेदन वाजिनः स्वाहा॥२॥ इदं पूर्वाह्णाय अपराह्णाय मध्यं
दिनाय प्रदोषाय अर्धरात्राय व्युष्ट्यै देव्यै महापथायै च न मम॥३॥ कर्तारं
च विकर्तारं विश्वकर्माणमोषधीश्च वनस्पतीन्॥ एतान्सर्वान्प्रपद्येहं वा
स्तुमेदे वाजिनः स्वाहा॥ इदं कर्त्रे विकर्त्रे विश्वकर्मणे ओषधीभ्यो वनस्पतिभ्यश्च
न मम॥४॥ धातारं च विधातारं निधीनां पतिं सह॥ एता॰ स्वाहा॥ इदं धा
त्रे विधात्रे निधीनां पतये च न मम॥५॥ स्योनं शिवमिदं वास्तु दत्तं ब्रह्म प्र
जापती॥ सर्वाश्च देवताः स्वाहा॥ इदं ब्रह्मणे प्रजापतये सर्वाभ्यो देवताभ्य
श्च न मम॥६॥ आसां षड् आहुतीनां संस्रवान् उदपात्रे प्रक्षिप्य॥ तेन उदके

५०

नमोदरं सं प्रेक्षयेत् ॥ अथ ग्रहहोमः अर्कादिसमिधः तिलांश्च ॥ यजमानेन द्र
व्यत्यागः ॥ सूर्याय इदं · सोमाय · भौमाय · बुधाय · बृहस्पतये · शुक्राय · श
नैश्चराय · राहवे · केतवे · रुद्राय · उमायै · स्कंदाय · विष्णवे · ब्रह्मणे · इंद्राय ·
२६ यमाय · कालाय · चित्रगुप्ताय · अग्नये · अद्भ्यः · धरायै · विष्णवे · इंद्राय ·
इंद्राण्यै · प्रजापतये · सर्पेभ्यः · ब्रह्मणे · गणेशाय · दुर्गायै · वायवे · आका
शाय · अश्विनीकुमाराभ्यां · इंद्राय · अग्नये · यमाय · निर्ऋतये · वरुणाय · २६ चै
वायवे · सोमाय · ईशानाय · ब्रह्मणे · अनंताय · वास्तोष्पतये · क्षेत्रपाल ·
नक्षत्रेभ्यः · योगेभ्यः · करणेभ्यः · सप्तर्षिभ्यः · कुलाचलेभ्यः · अष्टावसुभ्यः ·

आदित्येभ्यः · रुद्रेभ्यः · मरुद्भ्यः · मातृभ्यः · ऋतुभ्यः · मासेभ्यः · अयने
भ्यः · तिथिभ्यः · संवत्सरेभ्यः · सुपर्णेभ्यः · नागेभ्यः · सर्पेभ्यः · यक्षेभ्यः ·
गंधर्वेभ्यः · विद्याधरेभ्यः · अप्सरोभ्यः । राक्षसेभ्यः · भूतेभ्यः · मनुष्ये
भ्यः · इति ग्रहहोमः ॥ अथ वास्तुमंडलदेवताहोमः ॥ एकैकया आज्याहु
त्या तथैव चर्वाहुत्या होमः कर्तव्यः ॥ ॐ ब्रह्मणे स्वाहा ॥ इदं ॥ अर्यम्णे · सवि
त्रे · विवस्वते · विबुधाधिपतये · शिखिने · पर्जन्याय · जयंताय · कुलिशा
युधाय · सूर्याय · सत्याय · भृशाय · आकाशाय · वायवे · पूष्णे · वितथाय ·
गृहक्षताय · यमाय · गंधर्वाय · भृंगराजाय · मृगाय · पितृभ्यः · दौवारिका ·

२८

सुग्रीवाय· पुष्पदंताय· वरुणाय· असुराय· शोषाय· पापाय· रोगाय· ना
गराजाय· मुख्याय· भल्लाटाय· सोमाय· सर्पेभ्यः· अदितये· दितये· अ
द्भ्यः· सावित्राय· जयाय· रुद्राय· आपवत्साय· मित्राय· राजयक्ष्मणे·
पृथ्वीधराय· ४५ चरक्यै· विदार्यै· पूतनायै· पापराक्षस्यै· स्कंदाय· अर्य
म्णे· जंभकाय· पिलिपिच्छाय· उग्रसेनाय· डामराय· महाकालाय· पं
डुर्द्धराय· हेतुकाय· पीठकाय· त्रिपुरांतकाय· अग्निवेतालाय· अग्नि
जिह्वाय· कालाय· करालाय· एकपदे· भीमरूपाय· इंद्राय· अग्नये·
यमाय· निर्ऋतये· वरुणाय· वायवे· सोमाय· ईशानाय· ब्रह्मणे·

२८

अनंताय·॥ वास्तोष्पतइत्यनेन मंत्रेण चरुसम घृतसर्पिषाक्तं अष्टोत्तर
शतं हुत्वा॥ यवैः छल्लिकैः श्चैव समिद्भिः क्षीरवृक्षजैः॥ दूर्वाभिरथ
वा पुष्पैर्बिल्वबीजैस्तथैव च॥१॥ अष्टोत्तरशतं अष्टाविंशतिर्वा जुहु
यात्॥ अथाग्निपूजनं॥ अंतरग्ने·गंधादिबहिरस्यर्चा॥ शेषेण स्विष्टकृत॥
ॐ अग्नये स्विष्टकृते स्वाहा॥ इदमग्नये· अथ नवाहुतयः॥ भूः स्वाहा॥ भु
वः स्वा· स्वः स्वा· त्वं नो अग्ने· स त्वं नो अग्ने· अयाश्चा· ये ते शतं· उदुत्तमं· प्रजा
पतये स्वाहा॥ इदं प्रजापतये· ततः स्रुव्यपात्रे वान्यपात्रे वा सक्षीरं ओदुं
बरपत्राणि दूर्वा गोमयदधिमधुघृतं कुशायवान् हुत्वा॥ आसनानि नाग

२९

दंतस्थानानि देवतास्थापनानि तैः संनीतैः प्रोक्षयेत्। श्रीश्चलाम श्राणां
विश्वकर्मा ऋषिः। प्रतिष्ठा छंदः। रक्षोघ्नी शालादेवता। सर्वेषां अभिमर्शे
ने विनियोगः॥ अथ प्राकृतं धावति मृशति। ॐ श्रीश्च ते यशश्च पूर्वे सं
धौ गोपायेतां। इति मंत्रेण अभिमर्शनं करोति। ततः दक्षिणे संधावभि
मृशति॥ ॐ यज्ञश्च दक्षिणा च दक्षिणे संधौ गोपायेतां॥ पश्चिमे सं
धावभिमृशति॥ ॐ अन्नं च ब्राह्मणाश्च पश्चिमे संधौ गोपायेतां॥
उत्तरे संधावभिमृशति॥ ॐ ऊर्क् च सूनृता चोत्तरे संधौ गोपायेतां॥ त
तो गृहान्प्रपद्य वक्ष्यमाणमंत्रैर्यथालिंगं दिशमुपतिष्ठेत॥ तच्चथा॥

२९

५५

केता च मा सुकेता चेत्यस्य जुषा विवस्वान् ऋषिः। अनुष्टुप् छंदः। दिशो दे
वता। दिगुपस्थाने विनियोगः॥ केता च मा सुकेता च पुरस्ताद्गोपायेतामि
त्यग्निर्वै केतादित्यः सुकेता तौ प्रपद्ये ताभ्यां नमोस्तु तौ मा पुरस्ताद्गोपा
येतां। इमं मंत्रेण प्राचीं दिशमुपस्थाय अथ दक्षिणतः॥ गोपायमानं च मा
रक्षमाणा च दक्षिणतो गोपायेतामित्यहर्गोपायं रात्री रक्षमाणा ते प्रप
द्ये ताभ्यां नमोस्तु ते मा दक्षिणतो गोपायेतां॥ इति दक्षिणां दिशमु
पस्थाय। अथ पश्चात्॥ दीदिविश्च मा जागृविश्च पश्चाद्गोपायेतामि
त्यन्नं वै दीदिविः प्राणो जागृविस्तौ प्रपद्ये ताभ्यां नमोस्तु तौ मा पश्चाद्गो

ली

५६

पापपानण

२९

५८

पायेतां ॥ इति प्रतीचीं दिशमुपस्थाय ॥ अथोत्तरः ॥ अस्य प्रध्यमानवद्भ्राण
स्यो नरस्तो गोपायेतामिति चंद्रमा वा अस्वन्ना वायुरनवद्भ्राणस्तौ प्रपद्येतां स्यो
नमोस्त्वेतौ मो नरस्तो गोपायेतां ॥ इत्युदीचीं दिशमुपस्थाय ॥ एवं परिजिघ
भगृहे देवालयं मुख्यगृहस्य शांत्यां कुर्यात् ॥ महानसं आग्नेये । धनधान्या
र्थे वायव्यां ॥ मौंजार्थे नैर्ऋत्यां । उत्तरे पश्चिमे वा गृहपतेः शयनार्थे । ईशान्यां
मणिका स्थापनं ॥ ततः इंद्रादि लोकपालेभ्यः सदीपमाषभक्तबलिं दद्यात् ॥
ओ नारसिंहं ॥ इंद्राय सांगाय सपरिवाराय सायुधाय सशक्तिकाय एतं माष
भक्तबलिं समर्पयामि ॥ भो इंद्र प्राचीं दिशं रक्ष बलिं भक्षय ममास्य आयु

२९

५९

ष्यं कुरु ॥ आयुः कर्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्ता तुष्टिकर्ता शुभकर्ता भव
अनेन बलिदानेन इंद्रः प्रीयतां ॥ एवं सर्वत्र । इंद्राय · अग्नये · सांगाय ·
यमाय · निर्ऋतये · वरुणाय · वायवे · कुबेराय · ईशानाय · ब्रह्मणे · अनंताय ·
ततः गृहदेवताः ॥ वास्तोष्पतये ॥ ततः क्षेत्रपालाय महाबलिं कुंकुमाक्षपुष्पादि
युतं सदीपं सदक्षिणं क्षेत्रपालाय दद्यात् ॥ क्षेत्राधिपतिं दीपांतोपचारैः संपूज्य
साक्षतजलं गृहीत्वा ॥ नहि स्पशमित्यस्य । विश्वामित्र ऋषिः । त्रिष्टुप् छंदः ।
क्षेत्रपालो देवता ॥ बलिदाने विनियोगः ॥ ॐ नहि स्पशं ॥ क्षेत्रपालाय भूतप्रे
तपिशाचराक्षसशाकिनीडाकिनीवेतालादिपरिवारयुताय इमं सदीपं बलिं

३०

लमर्पयामि ॥ नमो नमो क्षेत्रपालाय इमं बलिं गृहाणाय जमानस्य आयुष्यं कुरु ॥ आ
युः कर्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्ता तुष्टिकर्ता स्य प्रसन्नो वरदो भव ॥ अनेन बलि
दानेन क्षेत्रपाः ॥ इमं बलिं शूद्रेण तु वर्लिं ब्राह्मणेन वा चतुष्पथे क्षिपेत् ॥ ततः प्र
क्षालितपाणिपादः ॥ आचम्य देशकालौ स्मृत्वा ॥ पूर्णाहुतिहोमं करिष्ये ॥ पुनरा
न्वयं संस्कृत्य ॥ चतुर्गृहीतं द्वादशगृहीतं वा आज्यमादाय ॥ तिष्ठन् समिधो ऽप्याधा
य समस्ते अग्ने २ इत्यनेन मंत्रेण जुहुयात् ॥ ततः वसोर्द्धारां कारये आरवेत्सम
ल्ल वस्त्र चंदन पुष्पमाल्या युतं ॥ मूर्द्धानं दिवो इति मंत्रेण जुहुयात् ॥ वसोर्द्धारा
मंत्रोऽयं च चैते ॥ ॐ भुवने ज्योतिः स्व० भूयास्तुरित्यंतं । सप्तपादु मेरित्यादि वेदस्वा
हेत्यंतं । ततस्त्र्यायुषाणि करोति संस्रवप्राशनं ॥ पवित्राभ्यां मार्जनं पवित्रप्रति

५९

गो

पत्तिः ॥ ब्रह्मणे पूर्णपात्रदानं ॥ प्रणीताविमोकः ॥ ततो यजमानं सपत्नीपुत्रा
दियुतं भद्रासने पूर्वं वत्लेडुपविश्य ॥ आचार्यसहिता ऋत्विजो ऽभिषेकमंत्रैरभि
षिंचेयुः ॥ तत्र मंत्राः ॥ देवस्य त्वा ॥ अग्निर्मे नैः पंचेंद्रैः पंचभिर्मारुतैः ॥ आपो हिष्ठे
त्यृचेन पावमानीभिः ॥ शिरो मे श्रीः ॥ पान्तु मां भवतु ॥ सुरास्त्वाभि त्यादि पौराणै
श्च गृहवास्तु वल्लू शोदनाभिषिंचेयुः ॥ ते ने वेदवें नैते च मंत्राः ॥ आत्वाहार्ष
मिति षड्ऋचस्य आंगिरसो ध्रुवो लिंगोक्ता त्रिष्टुप् अस्य गृहस्य ध्रुवत्वे सिध्यर्थं
गृहस्तु मंत्रेणे विनियोगः ॥ आत्वाहार्षमित्यादि शाकोत्त्र वेत्यंतं । गृहादिवा
स्तु देवताभ्यो नमम इत्युत्तरपूजां कुर्यात् ॥ गृहं सूत्रेण वेष्टयेत् ॥ तत्र मंत्राः ॥

६०

पावमानेनसूक्तेनरक्षोघ्नेनतथैवच ॥ ततः आचार्यो वास्तुमंडले ब्रह्मरक्षोनै
ऋत्यपांस्तु न्यषिनोपृथिवीध्यात्वा ॥ ॐ भूः धरायै नमः इति मंत्रेण वास्तुपाषा
णुपचारैरर्चयेत् ॥ सर्वदेवमयं वास्तुं वास्तुदेवमयं परं ॥ आनो भद्रा इति सूक्तेन
रक्षोघ्नेन कृणुष्वपाजः पंच ॥ ईशानकोणादारभ्य गृहसीमां च अविधिवत्सू
त्रेण वेष्टयेत् ॥ ततो दुग्धपूर्णपयो जलपूर्णयासतत्कुंभीस्थाने पेवत्सूत्रलयेत
धारादत्यमविधिवच्च कुर्यात् ॥ ततो गर्तत्यैशानभागे आग्नेये वा जानुमात्र
अधःखात्वा तां गोमयेनोपलिप्य ॥ चंदनपुष्पाक्षतैरलंकृत्य ॥ शाल्यादि
सप्तबीजदध्योदनं च प्रक्षिप्य ॥ नवकुंभे जलपूर्णे धृतपूर्णपात्रे हस्तद्वयेनादाय
आनुष्ठ्यामवनीगत्वा ॥ अरुणाय नमः इति संपूज्य ॥ तज्जले नगर्तंपूजयेत् ॥

२१ ने २१ ६१

वार्तें प्रदक्षिणे पुष्पे शुभं ॥ विपरीते त्वशुभं ॥ ततो मृन्मिनिर्मितपेटिकायां सप्तबी
जदध्योदनं शैवालपुष्पफलानि प्रक्षिप्य ॥ पूर्वस्थापितकूर्मवास्तुमूर्तिं मंग
लघोषेण नीयतस्यासंगंधादिभिः संपूज्य प्रार्थयेत् ॥ त्वद्दपाहि विश्वेश दे
हि मे गृहजं सुखं ॥ दष शालो नमस्ते तु म्रशय्यानिलयेप्रभो ॥ मद्गृहे धनधा
न्यादि समृद्धिं कुरु सर्वदा ॥ १ ॥ यथा मेरुगिरेः शृंगे देवानामालयः सदा ॥ तथा
मे मादिदैवेश्च मम गेहे स्थिरो भव ॥ २ ॥ ततः पेटिकामादाय ॥ तस्मिन्नवटे
अधोमुखं वास्तुमूर्तिं शनैर्निक्षिपेत् ॥ मंत्रेण ॥ सशैलसागरां पृथ्वीं य
था वहसि मूर्द्धनि ॥ तथा मां वह कल्याणसंपत्संततिभिः सह ॥ गर्तं च त

क रा सा ६२

३२

येव धान्यमहापूरिते मदाघिक्यौ नमं ॥ साम्यम च्यमं ॥ न्यूने गहितं ॥ गतेप
रिगा मये नैव लिप्यां [illegible] हेयं च पुष्पाक्षतैर्भूषयेत् ॥ दिक्लियां मूर्तिं आवा
यो यद् दद्यात् ॥ गृहे वापूजयेत् ॥ न सोग्ने: पश्चिमतः आचार्याय गोवस्त्र
हिरण्यादि निर्यथा शक्त्या परितोष्य क्षमापयेत् ॥ अर्त्विग्भ्योय यथा शक्त्या
दक्षिणां दद्यात् ॥ ततो गृहमध्ये भूपं वेन्न ॥ वास्तुपूजनाद्यागमंपचेत् ॥
यथाशक्त्या ब्राह्मणान् भोजयेत् ॥ भूयसीं दद्यात् ॥ शिवं वास्तु शिवं वास्तु
नित्यवेतो ब्रुवंतु ॥ इति ब्रूयात् ॥ ब्राह्मणान् शिष्टो गृही तान् विसर्जयेत् ॥ यां
तु देवगणाः सर्वे पूजामादाय पार्थिवीं ॥ इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥ ॥

३२

गच्छंगासुरश्रेष्ठ• ॥१॥ यह गावो ॥२॥ यस्त्वस्मिन् स्थितो निविसर्जयेत् ॥ इति प्रवे
दिनकृत्यं ॥ द्वितीये हि प्रवेशं कुर्यात् ॥ ततो यजमानो मंगलस्नानं कृत्वा शु
क्लांबरधरः ॥ ब्राह्मणैः कृतस्वस्त्ययनो मंगलतूर्यगीतं शांतिसूक्तपाठघो
षेण सकलत्रः सुवासिनी ब्राह्मणपुरःसरः सुशकुनं स्त्रिया सुदये तोरण
सूत्रवास्तोष्पतिं नायकं नमस्कृत्य परिवृतो शालां द्वारेण प्रविशति ॥ ततो
मंत्रः ॥ ॐ धर्मस्थूणाराजं श्रीस्तूपमहोरात्रे द्वारफलके ॥ इंद्रस्य गृहा वसु
मंतो वरूथिनस्तानहं प्रपद्ये प्रजया सह पशुभिः सह ॥ यन्मे किंचिदस्त्युप
नः सर्वगणः सखायः साधुसंमतः ॥ तां त्वा शाले अरिष्टवीरा गृहाः नः संतु सर्व
तः ॥ इत्यनेन प्रविशेत् ॥ अस्य शालां धर्मस्य सांगता सिद्ध्यर्थं यथा संख्या

३६

ब्राह्मणान्भोजयेत्॥ ३॥ लोकधर्मपूर्वकं वास्तुशांतिविधानं समाप्तं॥ इति व
ह्रि वास्तु संपूर्णं॥ इदं पुस्तकं पद्मा वरस्यात्म जेन कोटेश्वरेण पिण्डलापुरेण स
मास॥ श्री॥ वास्तुबलिदाने ओदनादिशेषः॥ ब्रह्मन्नु एषते बलिः अर्यम्णः
एष ते बलिरित्यादि प्रयोगेन पायसान्नं नव द्रव्य प्रमाणेन तद्द्रव्यैर्वा पूजा क्रमेण
सर्वेषां बलिदानं॥ चंदन पुष्प धूप दीप पाद्य स दन लाजाक्षत निल संयुक्तं
बलि प्रक्षेपेण॥ शर्वरापायसमर्पणे॥ सवित्रे गुडपूपान्॥ विवस्वते रक्तचं
दनपायसं॥ विबुधाधिपतये साज्यं हरितान्नौदनं॥ शिवेन घृताक्षताः॥
रुद्रन्याय सोत्पलं क्षीरोदनं॥ जयंताय पीतं च जंपिष्ट कूर्मं च॥ कुलिशायु
धाय पंचरत्न सहित पेष्ट कुलिशं॥ सूर्याय पेष्ट शालियुक्तं मोचित तानं॥ सत्या

३६

य घृतगोधूमान्॥ भृशाय आममत्स्यान्॥ आकाशाय शकुल सहितं मांसं॥ वाय
वे वस्त्रगंधयुतं स्वर्णपिष्टं॥ पूष्णे रक्तपुष्पसमन्वितं लाजाक्षीरं च॥ वितथाये द
धि गंधः पीतपुष्पसमन्वितं मोदनं॥ गृहक्षताय मधुधानं॥ यमाय पिशितौदनं॥ गं
धर्वाय गंधोदनं॥ भृंगराजाय मेषजिह्वं॥ मृगाय यावकं॥ पितृभ्यः कृसरान्नं दौ
वारिकाय दंतकाष्ठसहितं पेड्डूक बलिं॥ सुग्रीवाय अपूपान्॥ पुष्पदंता
य पायसं॥ वरुणाय लवणसंयुक्तं पद्मपारिखं च॥ असुराय सुरामांसं॥ शोषाय
घृतोदनं॥ पापाय यवान्नं॥ रोगाय घृतमोदकान्॥ अहये नागकेसरं॥ मुख्या
य नैवेद्यं॥ भल्लाटाय मोलोदनं॥ सोमाय मधुयुक्तं पायसं॥ सर्पेभ्यः शालि
पिष्टं॥

५७

२५

अदित्यैः स्वाहा समायुतं क्षीरं । दित्यै मधूसमिश्रा पोलिकां । अपः क्षीरं । सा
वित्राय मरीचियुक्तौदनं मोदकं च । आर्याय घृतौदनं । रुद्राय घृतपायसं । आ
पवत्साय दध्योदनं । मित्राय घृतौदनं । राजयक्ष्मणे पक्वान्नं । पृथ्वीधराय कु
ष्मांड मांसं । चरक्यै मांसोदनं । विदार्यै मधु स्वाहा समायुतं खण्डं घृतं दध्यो
दनं । पूतनायै पीतरक्तौदनं । पापराक्षस्यै मत्स्यमांसं सुरासवं । स्कंदाय मांसौद

२५

नं । अर्यम्णे गुडसरपोलिकां । जंभकाय रुधिरमांसं । पिलिपिच्छाय रक्त
मेपितानि । एतानि बलिद्रव्याणि आह कपिलपंचरात्रे उक्तानि । उग्रसेन

५८

डामरमतंकालाः पिलिपिच्छेभ्यः क्षेमेण पायसबलिदानं । ततो दिक्पाल
बलिः ॥ ततः इंद्राय नमः इत्यादि माषभक्त बलिः ॥ ततो मंडलात्पूर्वस्यां
दिशि गोमयेनोपलिप्तायां भूमौ सार्वभौतिकबलिदानं । तत्र मंत्रः ॥
ॐ भूतेभ्यो नमः । पितृभ्यो० राक्षसेभ्यो० पिशाचेभ्यो० गणेभ्यो० दि
व्यभूतेभ्यो० अंतरिक्षेभ्यो० मातृभ्यो नमः इति ॥ श्री ॥ श्री ॥ श्री ॥
कोटेश्वरेण इदं पुस्तकं रामापनाम्ना याज्ञवल्क्यशर्मणे
ण स्वदत्तात्तत्त्वार्थे यत्नेन दत्तं याज्ञवल्क्यशर्मणा स्वकी
यं चास्तु नानाति पुस्तकं कोटेश्वराय दत्तं हस्ताक्षर

[OrderDescription]
,CREATED=04.09.19 14:47
,TRANSFERRED=2019/09/04 at 15:00:30
,PAGES=36
,TYPE=STD
,NAME=S0001626
,Book Name=M-565-VASTUSHANTI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,